**Mahābhārata III.283**

२८३

मार्कण्डेय उवाच

तस्यां रात्र्यां व्यतीतायामुदिते सूर्यमण्डले ।

कृतपूर्वाह्णिकाः सर्वे समेयुस्ते तपोधनाः ॥ १ ॥

तदेव सर्वं सावित्र्या महाभाग्यं महर्षयः ।

द्युमत्सेनाय नातृप्यन्कथयन्तः पुनः पुनः ॥ २ ॥

ततः प्रकृतयः सर्वाः शाल्वेभ्योऽभ्यागता नृप ।

आचख्युर्निहतं चैव स्वेनामात्येन तं नृपम् ॥ ३ ॥

तं मन्त्रिणा हतं श्रुत्वा ससहायं सबान्धवम् ।

न्यवेदयन्यथातत्त्वं विद्रुतं च द्विषद्बलम् ॥ ४ ॥

ऐकमत्यं च सर्वस्य जनस्याथ नृपं प्रति ।

सचक्षुर्वाप्यचक्षुर्वा स नो राजा भवत्विति ॥ ५ ॥

अनेन निश्चयेनेह वयं प्रस्थापिता नृप ।

प्राप्तानीमानि यानानि चतुरङ्गं च ते बलम् ॥ ६ ॥

प्रयाहि राजन्भद्रं ते घुष्टस्ते नगरे जयः ।

अध्यास्स्व चिररात्राय पितृपैतामहं पदम् ॥ ७ ॥

चक्षुष्मन्तं च तं दृष्ट्वा राजानं वपुषान्वितम् ।

मूर्धभिः पतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८ ॥

ततोऽभिवाद्य तान्वृद्धान्द्विजानाश्रमवासिनः ।

तैश्चाभिपूजितः सर्वैः प्रययौ नगरं प्रति ॥ ९ ॥

शैब्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा ।

नरयुक्तेन यानेन प्रययौ सेनया वृता ॥ १० ॥

ततोऽभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः ।

पुत्रं चास्य महात्मानं यौवराज्येऽभषेचयन् ॥ ११ ॥

ततः कालेन महता सावित्र्याः कीर्थिवर्धनम् ।

तद्वै पुत्रशतं जज्ञे शूराणामनिवर्तिनाम् ॥ १२ ॥

भ्रातॄणां सोदराणां च तथैवास्याभवच्छतम् ।

मद्राधिपस्याश्वपतेर्मालव्यां सुमहाबलम् ॥ १३ ॥

एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।

भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतम् ॥ १४ ॥

तथैवैषापि कल्याणी द्रौपदी शीलसंमता ।

तारयिष्यति वः सर्वान्सावित्रीव कुलाङ्गना ॥ १५ ॥

वैशंपायन उवाच

एवं स पाण्डवस्तेन अनुनीतो महात्मना ।

विशोको विज्वरो राजन्काम्यके न्यवसत्तदा ॥ १६ ॥